## अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि। (१४५/२८०२)

गर्हायाम् इति निवृत्तम्। अनवक्लृप्तिः असम्भावना। अमर्षः अक्षमा। किंवृत्ते[1]ऽकिंवृत्ते चोपपदे अनवक्लृप्त्यमर्षयोः[2] धातोः लिङ्लृटौ [3]प्रत्ययौ भवतः। सर्वलकाराणाम[4]पवादः। बह्वचः पूर्वनिपातो लक्षण-व्यभिचारचिह्नम्। तेन यथासङ्ख्यं न भवति। [5]अनवक्लृप्तौ तावत्-नावकल्पयामि, [6]न सम्भावयामि, न श्रद्दधे तत्रभवान् नाम वृषलं याजयेत्, तत्रभवान् नाम वृषलं याजयिष्यति। को नाम वृषलो यं [7]तत्रभवान् वृषलं याजयेत्, को नाम तत्रभवान् वृषलं याजयिष्यति। अमर्षे – न मर्षयामि तत्रभवान्[8] वृषलं याजयेत्, याजयिष्यति। [9]को नाम वृषलो यं तत्रभवान् याजयेत्, याजयिष्यति। भूतविवक्षायां [10]तु क्रियातिपत्तौ वा [11]लृङ् भवति। भविष्यति [12]नित्यम्। [13]नावकल्पयामि तत्रभवान्नाम [14]वृषलमयाजयिष्यत्॥

## किंकिलास्त्यर्थेषु लृट्। (१४६/२८०३)

अनवक्लृप्त्यमर्षयोः इति वर्तते। किंकिल[15]शब्दः समुदाय एव उपपदम्। अस्त्यर्थाः अस्तिभवति-विद्यतयः। किंकिलास्त्यर्थेषु उपपदेषु अनवक्लृप्त्यमर्षयोः[16] धातोः लृट् प्रत्ययो भवति[17]। [18]लिङोऽपवादः। [19]किं-किल नाम तत्रभवान् वृषलं याजयिष्यति। अस्ति नाम तत्रभवान् वृषलं याजयिष्यति। भवति नाम तत्रभवान् वृषलं याजयिष्यति। विद्यते नाम तत्रभवान् वृषलं याजयिष्यति। न श्रद्दधे, न मर्षयामि। लिङ्निमित्तमिह नास्ति तेन लृङ् न भवति॥

## जातुयदोर्लिङ्। (१४७/२८०४)

[20]अनवक्लृप्त्यमर्षयोः इत्येव। जातु यद् इत्येतयोः उपपदयोः अनवक्लृप्त्यमर्षयोः गम्यमानयोः धातोः लिङ् प्रत्ययो भवति। लृटोऽपवादः। जातु तत्रभवान् वृषलं याजयेत्, [21]यन्नाम तत्रभवान् वृषलं याजयेत्, [22]न श्रद्दधे, न मर्षयामि।

[३३१] जातु[23]यदोर्लिङ्विधाने यदायद्योरुपसङ्ख्यानम्। (म. भा. २.१६४)

यदा भवद्विधः क्षत्रियं याजयेत्, यदि भवद्विधः क्षत्रियं याजयेत्, [24]न श्रद्दधे, न मर्षयामि। क्रियातिपत्तौ भूते वा लृङ्। भविष्यति[25] नित्यम्॥

## यच्चयत्रयोः। (१४८/२८०५)

[26]अनवक्लृप्त्यमर्षयोः[27] इत्येव। यच्च यत्र इत्येतयोः उपपदयोरनवक्लृप्त्यमर्षयोः [28]गम्यमानयोः धातोः लिङ् प्रत्ययो भवति। [29]लृटोऽपवादः। योगविभाग उत्तरार्थः। यथासङ्ख्यं[30] नेष्यते। यच्च तत्रभवान् वृषलं याजयेत्। यत्र तत्रभवान् वृषलं याजयेत्[31]। [32]क्रियातिपत्तौ यथायथं लृङ् भवति॥

---

1. च इत्यधिकम् फ. ह. 2. गम्यमानयोः इत्यधिकम् फ. ह. 3. प्रत्ययौ नास्ति फ. 4. अपवादौ फ. 5. अनवक्लृप्तौ नास्ति ह. 6. न सम्भावयामि नास्ति ह. 7. तत्रभवान् नास्ति फ. 8. नाम इत्यधिकम् फ. ह. 9. वाक्यमिदं नास्ति फ. 10. तु नास्ति क. 11. लृट् ह. 12. तु इत्यधिकम् क. 13. न मर्षयामि क. 14. वृषलम् नास्ति फ. 15. शब्दे ह, निपातसमुदायः क, शब्दसमुदायः अ. 16. गम्यमानयोः इत्यधिकम् क. फ. 17. त्रिषु कालेषु सर्वेषु साधनेषु इत्यधिकम् ह. 18. लिङोऽपवादः नास्ति फ. 19. किंकिल नास्ति फ. 20. वाक्यमिदं नास्ति फ. 21. नाम नास्ति फ. ह. 22. नावकल्पयामि फ. 23. यदोः नास्ति फ. 24. न श्रद्दधे नास्ति फ. 25. तु इत्यधिकम् ह. 26. वाक्यमिदं नास्ति फ. 27. उपपदयोः इत्यधिकम् ब. 28. एव इत्यधिकम ब. 29. लृटः एव ह. 30. अत्र इत्यधिकम् फ. 31. नावकल्पयामि नावमर्षयामि इत्यधिकम् फ. 32. क्रियातिपत्तौ नास्ति फ.